# Shri Vitthala Sahasranamastotram

# શ્રીવિઠ્ઠલસહસ્રનામસ્તોત્રમ્

## Document Information

```
Text title : viThThalasahasranAmastotram
File name : viThThalasahasranAamstotra.itx
Category : sahasranAma, vishhnu, vishnu
Location : doc_vishhnu
Proofread by : PSA Easwaran
Acknowledge-Permission: Mahaperiyaval Trust
Latest update : January 31, 2015
Send corrections to : sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીવિઠ્ઠસહસ્રનામસ્તોત્રમ્

શૌનક ઉવાચ-
સૂત વેદાર્થતત્વજ્ઞ શ્રુતં સર્વં ભવન્મુખાત્ ।
તથાપિ શ્રોતુમિચ્છામિ તીર્થં ક્ષેત્રઞ્ચ દૈવતમ્ ॥ ૧॥

સ્તોત્રં ચ જગતાં પૂજ્ય મૂઢાનામપિ મોક્ષદમ્ ।
સ્નાનાદ્દર્શનતઃ સ્મૃત્યા પાઠમાત્રાચ્છુભપ્રદમ્ ॥ ૨॥

સૂત ઉવાચ-
સ્મારિતોઽહં હરેસ્તીર્થં સ્તોત્રં ક્ષેત્રં ચ દૈવતમ્ ।
સ ક્ષણઃ સફલો યત્ર સ્મર્યતે મધુસૂદનઃ ॥ ૩॥

કયાપિ વૃત્યા વિપ્રેન્દ્ર તત્સર્વં કથયામિ તે ।
જનં કલિમલાક્રાન્તં દૃષ્ટ્વા વિષયલાલસમ્ ॥ ૪॥

જ્ઞાનાનધિકૃતં કર્મવિહીનં ભક્તવત્સલઃ ।
ચન્દ્રભાગાસરસ્તીરે પિતૃભક્તિપરં દ્વિજમ્ ॥ ૫॥

પુણ્ડરીકાભિધે ક્ષેત્રે ભીમયાઽઽપ્લાવિતે તતઃ ।
પુણ્ડરીકાભિધં શાન્તં નિમિત્તીકૃત્ય માધવઃ ॥ ૬॥

આવિરાસીત્સમુદ્ધર્તું જનં કલિમલાકુલમ્ ।
તત્તીર્થં ચન્દ્રભાગાખ્યં સ્નાનમાત્રેણ મોક્ષદમ્ ॥ ૭॥

તત્ક્ષેત્રં પાણ્ડુરઙ્ગાખ્યં દર્શનાન્મોક્ષદાયકમ્ ।
તદ્દૈવતં વિઠ્ઠલાખ્યં જગત્કારણમવ્યયમ્ ॥ ૮॥

સ્થિતિપ્રલયયોર્હેતું ભક્તાનુગ્રહવિગ્રહમ્ ।
સત્યજ્ઞાનાનન્દમયં સ્થાનજ્ઞાનાદિ યદ્વિદા ॥ ૯॥

યન્નામસ્મરણાદેવ કામાક્રાન્તોઽપિ સન્તરેત્ ।
પુણ્ડરીકેણ મુનિના પ્રાપ્તં તદ્દર્શનેન યત્ ॥ ૧૦॥

શૌનક ઉવાચ-
સહસ્રનામભિઃ સ્તોત્રં કૃતં વેદવિદુત્તમ ।
સકૃત્પઠનમાત્રેણ કામિતાર્થશ્રુતપ્રદમ્ ॥ ૧૧॥

તીર્થં ક્ષેત્રં દૈવતં ચ ત્વત્પ્રસાદાચ્છ્રુતં મયા ।
ઇદાનીં શ્રોતુમિચ્છામિ સ્તોત્રં તવ મુખામ્બુજાત્ ॥ ૧૨॥

સચ્ચિત્સુખસ્વરૂપોઽપિ ભક્તાનુગ્રહહેતવે ।
કીદૃશં ધૃતવાન્ રૂપં કૃપયાઽઽચક્ષ્વ તન્મમ ॥ ૧૩॥

સૂત ઉવાચ-
શ ૃણુષ્વાવહિતો બ્રહ્મન્ભગવદ્ધ્યાનપૂર્વકમ્ ।
સહસ્રનામસન્મન્ત્રં સર્વમન્ત્રોત્તમોત્તમમ્ ॥ ૧૪॥

અથ શ્રીવિઠ્ઠલસહસ્રનામસ્તોત્રમન્ત્રસ્ય શ્રીપુણ્ડરીક ઋષિઃ ।
શ્રીગુરુઃ પરમાત્મા શ્રીવિઠ્ઠલો દેવતા ।
અનુષ્ટુપ્ છન્દઃ । પુણ્ડરીકવરપ્રદ ઇતિ બીજમ્ ।
રુક્મિણીશો રમાપતિરિતિ શક્તિઃ । પાણ્ડુરઙ્ગેશ ઇતિ કીલકમ્ ।
શ્રી વિઠ્ઠલપ્રીત્યર્થં વિઠ્ઠલસહસ્રનામસ્તોત્રમન્ત્રજપે વિનિયોગઃ ।

ૐ પુણ્ડરીક વરપ્રદ ઇતિ અઙ્ગુષ્ઠાભ્યાં નપઃ ।
ૐ વિઠ્ઠલઃ પાણ્ડુરઙ્ગેશ ઇતિ તર્જનીભ્યાં નમઃ ।
ૐ ચન્દ્રભાગાસરોવાસ ઇતિ મધ્યમાભ્યાં નમઃ ।
ૐ વજ્રી શક્તિર્દણ્ડધર ઇતિ અનામિકાભ્યાં નમઃ ।
ૐ કલવંશરવાક્રાન્ત ઇતિ કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ એનોઽન્તકૃન્નામધ્યેય ઇતિ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

એવં હૃદયાદિન્યાસઃ ।
ૐ પુણ્ડરીક વરપ્રદ ઇતિ હૃદયાય નમઃ ।
ૐ ચન્દ્રભાગાસરોવાસ ઇતિ શિરસે સ્વાહા ।
ૐ વજ્રી શક્તિર્દણ્ડધર ઇતિ શિખાયૈ વષટ્ ।
ૐ કલવંશરવાક્રાન્ત ઇતિ કવચાય હુમ્ ।
ૐ એનોઽન્તકૃન્નામધ્યેય ઇતિ નેત્રત્રયાય વૌષટ્ ।
ૐ એનોઽન્તકૃન્નામધ્યેય ઇતિ અસ્ત્રાય ફટ્ ॥

ઇતિ દિગ્બન્ધઃ ।
ધ્યાનમ્ -

ઇષ્ટિકાયાં સમપદં તિષ્ઠન્તં પુરુષોત્તમમ્ ।
જઙ્ઘજસ્થકરદ્વન્દ્વં ક્ષુલ્લકાદામભૂષણમ્ ॥ ૧૫॥

સવ્યાસવ્યકરોદ્ભાસિપદ્મશઙ્ખવિભૂષિતમ્ ।
દરહાસસ્મેરમુખં શિક્યસ્કન્ધં દિગમ્બરમ્ ॥ ૧૬॥

સર્વાલઙ્કારસંયુક્તં બ્રહ્માદિગણસેવિતમ્ ।
જ્ઞાનાનન્દમયં દેવં ધ્યાયામિ હૃદિ વિઠ્ઠલમ્ ॥ ૧૭॥

અથ સ્તોત્રમ્ ।
ક્લીં વિઠ્ઠલઃ પાણ્ડુરઙ્ગેશ ઈશઃ શ્રીશો વિશેષજિત્ ।
શેષશાયી શમ્ભુવન્દ્યઃ શરણ્યઃ શઙ્કરપ્રિયઃ ॥ ૧॥

ચન્દ્રભાગાસરોવાસઃ કોટિચન્દ્રપ્રભાસ્મિતઃ ।
વિધાધૃસૂચિતઃ સર્વપ્રમાણાતીત અવ્યયઃ ॥ ૨॥

પુણ્ડરીકસ્તુતો વન્દ્યો ભક્તચિત્તપ્રસાદકઃ ।
સ્વધર્મનિરતઃ પ્રીતો ગોગોપીપરિવારિતઃ ॥ ૩॥

ગોપિકાશતનીરાજ્યઃ પુલિનાક્રીડ આત્મભૂઃ ।
આત્માઽઽત્મારામ આત્મસ્થઃ આત્મારામનિષેવિતઃ ॥ ૪॥

સચ્ચિત્સુખં મહામાયી મહદવ્યક્તમદ્ભુતઃ ।
સ્થૂલરૂપઃ સૂક્ષ્મરૂપઃ કારણં પરમઞ્જનમ્ ॥ ૫॥

મહાકારણમાધારઃ અધિષ્ઠાનં પ્રકાશકઃ ।
કઞ્જપાદો રક્તનખો રક્તપાદતલઃ પ્રભુઃ ॥ ૬॥

સામ્રાજ્યચિહ્નિતપદો નીલગુલ્ફઃ સુજઙ્ઘકઃ ।
સજ્જાનુઃ કદલીસ્તમ્ભનિભોરુરુરુવિક્રમઃ ॥ ૭॥

પીતામ્બરાવૃતકટિઃ ક્ષુલ્લકાદામભૂષણઃ ।
કટિવિન્યસ્તહસ્તાબ્જઃ શઙ્ખી પદ્મવિભૂષિતઃ ॥ ૮॥

ગમ્ભીરનાભિર્બ્રહ્માધિષ્ઠિતનાભિસરોરુહઃ ।
ત્રિવલીમણ્ડિતોદારોદરોમાવલિમાલિનઃ ॥ ૯॥

કપાટવક્ષાઃ શ્રીવત્સભૂષિતોરાઃ કૃપાકરઃ ।
વનમાલી કમ્બુકણ્ઠઃ સુસ્વરઃ સામલાલસઃ ॥ ૧૦॥

કઞ્જવક્ત્રઃ શ્મશ્રુહીનચુબુકો વેદજિહ્વકઃ ।
દાડિમીબીજસદૃશરદો રક્તાધરો વિભુઃ ॥ ૧૧॥

નાસામુક્તાપાટલિતાધરચ્છવિરરિન્દમઃ ।
શુકનાસઃ કઞ્જનેત્રઃ કુણ્ડલાક્રમિતાંસકઃ ॥ ૧૨॥

મહાબાહુર્ઘનભુજઃ કેયૂરાઙ્ગદમણ્ડિતઃ ।
રત્નભૂષિતભૂષાઢ્યમણિબન્ધઃ સુભૂષણઃ ॥ ૧૩॥

રક્તપાણિતલઃ સ્વઙ્ગઃ સન્મુદ્રામણ્ડિતાઙ્ગુલિઃ ।
નખપ્રભારઞ્જિતાબ્જઃ સર્વસૌન્દર્યમણ્ડિતઃ ॥ ૧૪॥

સુભ્રૂરર્ધશશિપ્રખ્યલલાટઃ કામરૂપધૃક્ ।
કુઙ્કુમાઙ્કિતસદ્ભાલઃ સુકેશો બર્હભૂષણઃ ॥ ૧૫॥

કિરીટભાવ્યાપ્તનભો વિકલીકૃતભાસ્કરઃ ।
વનમાલી પતિવાસાઃ શાર્ઙ્ગચાપોઽસુરાન્તકઃ ॥ ૧૬॥

દર્પાપહઃ કંસહન્તા ચાણૂરમુરમર્દનઃ ।
વેણુવાદનસન્તુષ્ટો દધ્યન્નાસ્વાદલોલુપઃ ॥ ૧૭॥

જિતારિઃ કામજનકઃ કામહા કામપૂરકઃ ।
વિક્રોધો દારિતામિત્રો ભૂર્ભુવઃસુવરાદિરાટ્ ॥ ૧૮॥

અનાદિરજનિર્જન્યજનકો જાહ્નવીપદઃ ।
બહુજન્મા જામદગ્ન્યઃ સહસ્રભુજખણ્ડનઃ ॥ ૯૯॥

કોદણ્ડધારી જનકપૂજિતઃ કમલાપ્રિયઃ ।
પુણ્ડરીકભવદ્વેષી પુણ્ડરીકભવપ્રિયઃ ॥ ૨૦॥

પુણ્ડરીકસ્તુતિરસઃ સદ્ભક્તપરિપાલકઃ ।
સુષુમાલાસઙ્ગમસ્થો ગોગોપીચિત્તરઞ્જનઃ ॥ ૨૧॥

ઇષ્ટિકાસ્થો ભક્તવશ્યસ્ત્રિમૂર્તિર્ભક્તવત્સલઃ ।
લીલાકૃતજગદ્ધામા જગત્પાલો હરો વિરાટ્ ॥ ૨૨॥

અશ્વત્થપદ્મતીર્થસ્થો નારદસ્તુતવૈભવઃ ।
પ્રમાણાતીતતત્ત્વજ્ઞસ્તત્ત્વમ્પદનિરૂપિતઃ ॥ ૨૩॥

અજાજનિરજાજાનિરજાયો નીરજોઽમલઃ ।
લક્ષ્મીનિવાસઃ સ્વર્ભૂષો વિશ્વવન્દ્યો મહોત્સવઃ ॥ ૨૪॥

જગદ્યોનિરકર્તાઽઽદ્યો ભોક્તા ભોગ્યો ભવાતિગઃ ।
ષડ્ગુણૈશ્વર્યસમ્પન્નો ભગવાન્મુક્તિદાયકઃ ॥ ૨૫॥

અધઃપ્રાણો મનો બુદ્ધિઃ સુષુપ્તિઃ સર્વગો હરિઃ ।
મત્સ્યઃ કૂર્મો વરાહોઽત્રિર્વામનો હીરરૂપધૃત્ ॥ ૨૬॥

નારસિંહો ઋષિર્વ્યાસો રામો નીલાંશુકો હલી ।
બુદ્ધોઽર્હન્ સુગતઃ કલ્કી નરો નારાયણઃ પરઃ ॥ ૨૭॥

પરાત્પરઃ કરીડ્યેશો નક્રશાપવિમોચનઃ ।
નારદોક્તિપ્રતિષ્ઠાતા મુક્તકેશી વરપ્રદઃ ॥ ૨૮॥

ચન્દ્રભાગાપ્સુ સુસ્નાતઃ કામિતાર્થપ્રદોઽનઘઃ ।
તુલસીદામભૂષાઢ્યસ્તુલસીકાનનપ્રિયઃ ॥ ૨૯॥

પાણ્ડુરઙ્ગઃ ક્ષેત્રમૂર્તિઃ સર્વમૂર્તિરનામયઃ ।
પુણ્ડરીકવ્યાજકૃતજડોદ્ધારઃ સદાગતિઃ ॥ ૩૦॥

અગતિઃ સદ્ગતિઃ સભ્યો ભવો ભવ્યો વિધીડિતઃ ।
પ્રલમ્બઘ્નો દ્રુપદજાચિન્તાહારી ભયાપહઃ ॥ ૩૧॥

વહ્નિવક્ત્રઃ સૂર્યનુતો વિષ્ણુસ્ત્રૈલોક્યરક્ષકઃ ।
જગદ્ભક્ષ્યો જગદ્ગેહો જનારાધ્યો જનાર્દનઃ ॥ ૩૨॥

જેતા વિષ્ણુર્વરારોહો ભીષ્મપૂજ્યપદામ્બુજઃ ।
ભર્તા ભીષ્ણકસમ્પૂજ્યઃ શિશુપાલવધોદ્યતઃ ॥ ૩૩॥

શતાપરાધસહનઃ ક્ષમાવાનાદિપૂજનઃ ।
શિશુપાલશિરચ્છેત્તા દન્તવક્ત્રબલાપહઃ ॥ ૩૪॥

શિશુપાલકૃતદ્રોહઃ સુદર્શનવિમોચનઃ ॥ ૩૫॥

સશ્રીઃ સમાયો દામેન્દ્રઃ સુદામક્રીડનોત્સુકઃ ।
વસુદામકૃતક્રીડઃ કિઙ્કિણીદામસેવિતઃ ॥ ૩૬॥

પઞ્ચાઙ્ગપૂજનરતઃ શુદ્ધચિત્તવશંવદઃ ।
રુક્મિણીવલ્લભઃ સત્યભામાભૂષિતવિગ્રહઃ ॥ ૩૭॥

નાગ્નજિત્યા કૃતોત્સાહઃ સુનન્દાચિત્તમોહનઃ ।
મિત્રવૃન્દાઽઽલિઙ્ગિતાઙ્ગો બ્રહ્મચારી વટુપ્રિયઃ ॥ ૩૮॥

સુલક્ષણાધૌતપદો જામ્બવત્યા કૃતાદરઃ ।
સુશીલાશીલસન્તુષ્ટો જલકેલિકૃતાદરઃ ॥ ૩૯ ॥

વાસુદેવો દેવકીડ્યો નન્દાનન્દકરાઙ્ઘ્રિયુક્ ।
યશોદામાનસોલ્લાસો બલાવરજનિઃસ્વભૂઃ ॥ ૪૦ ॥

સુભદ્રાઽઽનન્દદો ગોપવશ્યો ગોપીપ્રિયોઽજયઃ ।
મન્દારમૂલવેદિસ્થઃ સન્તાનતરુસેવિતઃ ॥ ૪૧ ॥

પારિજાતાપહરણઃ કલ્પદ્રુમપુરઃસરઃ ।
હરિચન્દનલિપ્તાઙ્ગ ઇન્દ્રવન્દ્યોઽઙ્ઘ્રિપૂજિતઃ ॥ ૪૨ ॥

યમનેતા નૈરૃતેયો વરુણેશઃ ખગપ્રિયઃ ।
કુબેરવન્દ્ય ઈશેશો વિધીડ્યોઽનન્તવન્દિતઃ ॥ ૪૩ ॥

વજ્રી શક્તિર્દણ્ડધરઃ ખડ્ગી પાશ્યઙ્કુશી ગદી ।
ત્રિશૂલી કમલી ચક્રી સત્યવ્રતમયો નવઃ ॥ ૪૪ ॥

મહામન્ત્રઃ પ્રણવભૂર્ભક્તચિન્તાપહારકઃ ।
સ્વક્ષેત્રવાસી સુખદઃ કામી ભક્તવિમોચનઃ ॥ ૪૫ ॥

સ્વનામકીર્તનપ્રીતઃ ક્ષેત્રેશઃ ક્ષેત્રપાલકઃ ।
કામશ્ચક્રધરાર્ધશ્ચ ત્રિવિક્રમમયાત્મકઃ ॥ ૪૬ ॥

પ્રજ્ઞાનકરજિત્કાન્તિરૂપવર્ણઃ સ્વરૂપવાન્ ।
સ્પર્શેન્દ્રિયં શૌરિમયો વૈકુણ્ઠઃ સાનિરુદ્ધકઃ ॥ ૪૭ ॥

ષડક્ષરમયો બાલઃ શ્રીકૃષ્ણો બ્રહ્મભાવિતઃ ।
નારદાધિષ્ઠિતક્ષેમો વેણુવાદનતત્પરઃ ॥ ૪૮ ॥

નારદેશપ્રતિષ્ઠાતા ગોવિન્દો ગરુડધ્વજઃ ।
સાધારણઃ સમઃ સૌમ્યઃ કલાવાન્ કમલાલયઃ ॥ ૪૯ ॥

ક્ષેત્રપઃ ક્ષણદાધીશવક્ત્રઃ ક્ષેમકરક્ષણઃ ।
લવો લવણિમાધામ લીલાવાન્ લઘુવિગ્રહઃ ॥ ૫૦ ॥

હયગ્રીવો હલી હંસો હતકંસો હલિપ્રિયઃ ।
સુન્દરઃ સુગતિર્મુક્તઃ સત્સખો સુલભઃ સ્વભૂઃ ॥ ૫૧ ॥

સામ્રાજ્યદઃ સામરાજઃ સત્તા સત્યઃ સુલક્ષણઃ ।

ષડ્ગુણૈશ્વર્યનિલયઃ ષડૃતુપરિસેવિતઃ ॥ ૫૨॥

ષડઙ્ગશોધિતઃ ષોઢા ષડ્દર્શનનિરૂપિતઃ ।
શેષતલ્પઃ શતમખઃ શરણાગતવત્સલઃ ॥ ૫૩॥

સશમ્ભુઃ સમિતિઃ શઙ્ખવહઃ શાર્ઙ્ગસુચાપધૃત્ ।
વહ્નિતેજા વારિજાસ્યઃ કવિર્વંશીધરો વિગઃ ॥ ૫૪॥

વિનીતો વિપ્રિયો વાલિદલનો વજ્રભૂષણઃ ।
રુક્મિણીશો રમાજાની રાજા રાજન્યભૂષણઃ ॥ ૫૫॥

રતિપ્રાણપ્રિયપિતા રાવણાન્તો રઘૂદ્વહઃ ।
યજ્ઞભોક્તા યમો યજ્ઞભૂષણો યજ્ઞદૂષણઃ ॥ ૫૬॥

યજ્વા યશોવાન્ યમુનાકૂલકુઞ્જપ્રિયો યમી ।
મેરુર્મનીષી મહિતો મુદિતઃ શ્યામવિગ્રહઃ ॥ ૫૭॥

મન્દગામી મુગ્ધમુખો મહેશો મીનવિગ્રહઃ ।
ભીમો ભીમાઙ્ગજાતીરવાસી ભીમાર્તિભઞ્જનઃ ॥ ૫૮॥

ભૂભારહરણો ભૂતભાવનો ભરતાગ્રજઃ ।
બલં બલપ્રિયો બાલો બાલક્રીડનતત્પરઃ ॥ ૫૯॥

બકાસુરાન્તકો બાણાસુરદર્પકવાડવઃ ।
બૃહસ્પતિબલારાતિસૂનુર્બલિવરપ્રદઃ ॥ ૬૦॥

બોદ્ધા બન્ધુવધોદ્યુક્તો બન્ધમોક્ષપ્રદો બુધઃ ।
ફાલ્ગુનાનિષ્ટહા ફલ્ગુકૃતારાતિઃ ફલપ્રદઃ ॥ ૬૧॥

ફેનજાતૈરકાવજ્રકૃતયાદવસઙ્ક્ષયઃ ।
ફાલ્ગુનોત્સવસંસક્તઃ ફણિતલ્પઃ ફણાનટઃ ॥ ૬૨॥

પુણ્યઃ પવિત્રઃ પાપાત્મદૂરગઃ પણ્ડિતાગ્રણીઃ ।
પોષણઃ પુલિનાવાસઃ પુણ્ડરીકમનોર્વશઃ ॥ ૬૩॥

નિરન્તરો નિરાકાઙ્ક્ષો નિરાતઙ્કો નિરઞ્જનઃ ।
નિર્વિણ્ણમાનસોલ્લાસો નયનાનન્દનઃ સતામ્ ॥ ૬૪॥

નિયમો નિયમી નમ્યો નન્દબન્ધનમોચનઃ ।
નિપુણો નીતિમાન્નેતા નરનારાયણવપુઃ ॥ ૬૫॥

ધેનુકાસુરવિદ્વેષી ધામ ધાતા ધની ધનમ્ ।
ધન્યો ધન્યપ્રિયો ધર્તા ધીમાન્ ધર્મવિદુત્તમઃ ॥ ૬૬॥

ધરણીધરસન્ધર્તા ધરાભૂષિતદંષ્ટ્રકઃ ।
દૈતેયહન્તા દિગ્વાસા દેવો દેવશિખામણિઃ ॥ ૬૭॥

દામ દાતા દીપ્તિભાનુઃ દાનવાદમિતા દમઃ ।
સ્થિરકાર્યઃ સ્થિતપ્રજ્ઞઃ સ્થવિરસ્થાપકઃ સ્થિતિઃ ।
સ્થિતલોકત્રયવપુઃ સ્થિતિપ્રલયકારણમ્ ॥ ૬૮॥

સ્થાપકસ્તીર્થચરણસ્તર્પકસ્તરુણીરસઃ ।
તારુણ્યકેલિનિપુણસ્તરણસ્તરણિપ્રભુઃ ॥ ૬૯॥

તોયમૂર્તિસ્તમોઽતીતઃ સ્તમ્ભોદ્ભૂતસ્તપઃપરઃ ।
તડિદ્વાસાસ્તોયદાભસ્તારસ્તારસ્વરપ્રિયઃ ॥ ૭૦॥

ણકારો ઢૌકિતજગત્ત્રિતૂર્યપ્રીતભૂસુરઃ ।
ડમરૂપ્રિયહૃદ્વાસી ડિણ્ડિમધ્વનિગોચરઃ ॥ ૭૧॥

ઠયુગસ્થમનોર્ગમ્યઃ ઠઙ્કારિ ધનુરાયુધઃ ।
ટણત્કારિતકોદણ્ડહતારિર્ગણસૌખ્યદઃ ॥ ૭૨॥

ઝાઙ્કારિચાઞ્ચરીકાઙ્ગી શ્રુતિકલ્હારભૂષણઃ ।
જરાસન્ધાર્દિતજગત્સુખભૂર્જઙ્ગમાત્મકઃ ॥ ૭૩॥

જગજ્જનિર્જગદ્ભૂષો જાનકીવિરહાકુલઃ ।
જિષ્ણુશોકાપહરણો જન્મહીનો જગત્પતિઃ ॥ ૭૪॥

છત્રિતાહીન્દ્રસુભગઃ છદ્મી છત્રિતભૂધરઃ ।
છાયાસ્થલોકત્રિતયછલેન બલિનિગ્રહી ॥ ૭૫॥

ચેતશ્ચમત્કારકરઃ ચિત્રી ચિત્રસ્વભાવવાન્ ।
ચારુભૂશ્ચન્દ્રચૂડશ્ચ ચન્દ્રકોટિસમપ્રભઃ ॥ ૭૬॥

ચૂડારત્નદ્યોતિભાલશ્ચલન્મકરકુણ્ડલઃ ।
ચરુભુક્ ચયનપ્રીતશ્ચમ્પકાટવિમધ્યગઃ ॥ ૭૭॥

ચાણૂરહન્તા ચન્દ્રાઙ્કનાશનશ્ચન્દ્રદીધિતિઃ ।
ચન્દનાલિપ્તસર્વાઙ્ગશ્ચારુચામરમણ્ડિતઃ ॥ ૭૮॥

ઘનશ્યામો ઘનરવો ઘટોત્કચપિતૃપ્રિયઃ ।

ઘનસ્તનીપરીવારો ઘનવાહનગર્વહા ॥ ૭૯॥

ગઙ્ગાપદો ગતક્લેશો ગતક્લેશનિષેવિતઃ ।
ગણનાથો ગજોદ્ધર્તા ગાયકો ગાયનપ્રિયઃ ॥ ૮૦॥

ગોપતિર્ગોપિકાવશ્યો ગોપબાલાનુગઃ પતિઃ ।
ગણકોટિપરીવારો ગમ્યો ગગનનિર્મલઃ ॥ ૮૧॥

ગાયત્રીજપસમ્પ્રીતો ગણ્ડકીસ્થો ગુહાશયઃ ।
ગુહારણ્યપ્રતિષ્ઠાતા ગુહાસુરનિષૂદનઃ ॥ ૮૨॥

ગીતકીર્તિર્ગુણારામો ગોપાલો ગુણવર્જિતઃ ।
ગોપ્રિયો ગોચરપ્રીતો ગાનનાટ્યપ્રવર્તકઃ ॥ ૮૩॥

ખટ્વાયુધઃ ખરદ્વેષી ખાતીતઃ ખગમોચનઃ ।
ખગપુચ્છકૃતોત્તંસઃ ખેલદ્બાલકૃતપ્રિયઃ ॥ ૮૪॥

ખટ્વાઙ્ગપોથિતારાતિઃ ખઞ્જનાક્ષઃ ખશીર્ષકઃ ।
કલવંશરવાક્રાન્તગોપીવિસ્મારિતાર્ભકઃ ॥ ૮૫॥

કલિપ્રમાથી કઞ્જાસ્યઃ કમલાયતલોચનઃ ।
કાલનેમિપ્રહરણઃ કુણ્ઠિતાર્તિકિશોરકઃ ॥ ૮૬॥

કેશવઃ કેવલઃ કણ્ઠીરવાસ્યઃ કોમલાઙ્ઘ્રિયુક્ ।
કમ્બલી કીર્તિમાન્ કાન્તઃ કરુણામૃતસાગરઃ ॥ ૮૭॥

કુબ્જાસૌભાગ્યદઃ કુબ્જાચન્દનાલિપ્તગાત્રકઃ ।
કાલઃ કુવલયાપીડહન્તા ક્રોધસમાકુલઃ ॥ ૮૮॥

કાલિન્દીપુલિનાક્રીડઃ કુઞ્જકેલિકુતૂહલી ।
કાઞ્ચનં કમલાજાનિઃ કલાજ્ઞઃ કામિતાર્થદઃ ॥ ૮૯॥

કારણં કરણાતીતઃ કૃપાપૂર્ણઃ કલાનિધિઃ ।
ક્રિયારૂપઃ ક્રિયાતીતઃ કાલરૂપઃ ક્રતુપ્રભુઃ ॥ ૯૦॥

કટાક્ષસ્તમ્ભિતારાતિઃ કુટિલાલકભૂષિતઃ ।
કૂર્માકારઃ કાલરૂપી કરીરવનમધ્યગઃ ॥ ૯૧॥

કલકણ્ઠી કલરવઃ કલકણ્ઠરુતાનુકૃત્ ।
કરદ્વારપુરઃ કૂટઃ સર્વેષાં કવલપ્રિયઃ ॥ ૯૨॥

કલિકલ્મષહા ક્રાન્તગોકુલઃ કુલભૂષણઃ ।
કૂટારિઃ કુતુપઃ કીશપરિવારઃ કવિપ્રિયઃ ॥ ૯૩॥

કુરુવન્દ્યઃ કઠિનદોર્દણ્ડખણ્ડિતભૂભરઃ ।
કિઙ્કરપ્રિયકૃત્કર્મરતભક્તપ્રિયઙ્કરઃ ॥ ૯૪॥

અમ્બુજાસ્યોઽઙ્ગનાકેલિરમ્બુશાય્યમ્બુધિસ્તુતઃ ।
અમ્ભોજમાલ્યમ્બુવાહલસદઙ્ગોઽન્ત્રમાલકઃ ॥ ૯૫॥

ઔદુમ્બરફલપ્રખ્યબ્રહ્માણ્ડાવલિચાલકઃ ।
ઓષ્ઠસ્ફુરન્મુરલિકારવાકર્ષિતગોકુલઃ ॥ ૯૬॥

ઐરાવતસમારૂઢ ઐન્દ્રીશોકાપહારકઃ ।
ઐશ્વર્યાવધિરૈશ્વર્યમૈશ્વર્યાષ્ટદલસ્થિતઃ ॥ ૯૭॥

એણશાવસમાનાક્ષ એધસ્તોષિતપાવકઃ ।
એનોઽન્તકૃન્નામધેયસ્મૃતિસંસૃતિદર્પહા ॥ ૯૮॥

લૂનપઞ્ચક્લેશપદો લૂતાતન્તુર્જગત્કૃતિઃ ।
લુપ્તદૃશ્યો લુપ્તજગજ્જયો લુપ્તસુપાવકઃ ॥ ૯૯॥

રૂપાતીતો રૂપનામરૂપમાયાદિકારણમ્ ।
ઋણહીનો ઋદ્ધિકારી ઋણાતીતો ઋતંવદઃ ॥ ૧૦૦॥

ઉષાનિમિત્તબાણઘ્ન ઉષાહાર્યૂર્જિતાશયઃ ।
ઊર્ધ્વરૂપોર્ધ્વાધરગ ઊષ્મદગ્ધજગત્ત્રયઃ ॥ ૧૦૧॥

ઉદ્ધવત્રાણનિરત ઉદ્ધવજ્ઞાનદાયકઃ ।
ઉદ્ધર્તોદ્ધવ ઉન્નિદ્ર ઉદ્બોધ ઉપરિસ્થિતઃ ॥ ૧૦૨॥

ઉદધિક્રીડ ઉદધિતનયાપ્રિય ઉત્સવઃ ।
ઉચ્છિન્નદેવતારાતિરુદધ્યાવૃતિમેખલઃ ॥ ૧૦૩॥

ઈતિઘ્ન ઈશિતા ઈજ્ય ઈડ્ય ઈહાવિવર્જિતઃ ।
ઈશધ્યેયપદામ્ભોજ ઇન ઈનવિલોચનઃ ॥ ૧૦૪॥

ઇન્દ્ર ઇન્દ્રાનુજનટ ઇન્દિરાપ્રાણવલ્લભઃ ।
ઇન્દ્રાદિસ્તુત ઇન્દ્રશ્રીરિદમિત્થમભીતકૃત્ ॥ ૧૦૫॥

આનન્દાભાસ આનન્દ આનન્દનિધિરાત્મદૃક્ ।
આયુરાર્તિઘ્ન આયુષ્ય આદિરામયવર્જિતઃ ॥ ૧૦૬॥

આદિકારણમાધાર આધારાદિકૃતાશ્રયઃ ।
અચ્યુતૈશ્વર્યમમિત અરિનાશ અઘાન્તકૃત્ ॥ ૧૦૭ ॥

અન્નપ્રદોઽન્નમખિલાધાર અચ્યુત અબ્જભૃત્ ।
ચન્દ્રભાગાજલક્રીડાસક્તો ગોપવિચેષ્ટિતઃ ॥ ૧૦૮ ॥

હૃદયાકારહૃદ્ભૂષો યષ્ટિમાન્ ગોકુલાનુગઃ ।
ગવાં હુઙ્કૃતિસમ્પ્રીતો ગવાલીઢપદામ્બુજઃ ॥ ૧૦૯ ॥

ગોગોપત્રાણસુશ્રાન્ત અશ્રમી ગોપવીજિતઃ ।
પાથેયાશનસમ્પ્રીતઃ સ્કન્ધશિક્યો મુખામ્બુપઃ ॥ ૧૧૦ ॥

ક્ષેત્રપારોપિતક્ષેત્રો રક્ષોઽધિકૃતભૈરવઃ ।
કાર્યકારણસઙ્ઘાતસ્તાટકાન્તસ્તુ રક્ષહા ॥ ૧૧૧ ॥

હન્તા તારાપતિસ્તુત્યો યક્ષઃ ક્ષેત્રં ત્રયીવપુઃ ।
પ્રાઞ્જલિર્લોલનયનો નવનીતાશનપ્રિયઃ ॥ ૧૧૨ ॥

યશોદાતર્જિતઃ ક્ષીરતસ્કરો ભાણ્ડભેદનઃ ।
મુખાશનો માતૃવશ્યો માતૃદૃશ્યમુખાન્તરઃ ॥ ૧૧૩ ॥

વ્યાત્તવક્ત્રો ગતભયો મુખલક્ષ્યજગત્રયઃ ।
યશોદાસ્તુતિસમ્પ્રીતો નન્દવિજ્ઞાતવૈભવઃ ॥ ૧૧૪ ॥

સંસારનૌકાધર્મજ્ઞો જ્ઞાનનિષ્ઠો ધનાર્જકઃ ।
કુબેરઃ ક્ષત્રનિધનં બ્રહ્મર્ષિર્બ્રાહ્મણપ્રિયઃ ॥ ૧૧૫ ॥

બ્રહ્મશાપપ્રતિષ્ઠાતા યદુરાજકુલાન્તકઃ ।
યુધિષ્ઠિરસખો યુદ્ધદક્ષઃ કુરુકુલાન્તકૃત્ ॥ ૧૧૬ ॥

અજામિલોદ્ધારકારી ગણિકામોચનો ગુરુઃ ।
જામ્બવદ્યુદ્ધરસિકઃ સ્યમન્તમણિભૂષણઃ ॥ ૧૧૭ ॥

સુભદ્રાબન્ધુરક્રૂરવન્દિતો ગદપૂર્વજઃ ।
બલાનુજો બાહુયુદ્ધરસિકો મયમોચનઃ ॥ ૧૧૮ ॥

દગ્ધખાણ્ડવસમ્પ્રીતહુતાશો હવનપ્રિયઃ ।
ઉદ્યદાદિત્યસઙ્કાશવસનો હનુમદ્રુચિઃ ॥ ૧૧૯ ॥

ભીષ્મબાણવ્રણાકીર્ણઃ સારથ્યનિપુણો ગુણી ।

ભીષ્મપ્રતિભટશ્ચક્રધરઃ સમ્પ્રીણિતાર્જુનઃ ॥ ૧૨૦॥

સ્વપ્રતિજ્ઞાહાનિહૃષ્ટો માનાતીતો વિદૂરગઃ ।
વિરાગી વિષયાસક્તો વૈકુણ્ઠોઽકુણ્ઠવૈભવઃ ॥ ૧૨૧॥

સઙ્કલ્પઃ કલ્પનાતીતઃ સમાધિર્નિર્વિકલ્પકઃ ।
સવિકલ્પો વૃત્તિશૂન્યો વૃત્તિર્બીજમતીગતઃ ॥ ૧૨૨॥

મહાદેવોઽખિલોદ્ધારી વેદાન્તેષુ પ્રતિષ્ઠિતઃ ।
તનુર્બૃહત્તનૂરણ્વરાજપૂજ્યોઽજરોઽમરઃ ॥ ૧૨૩॥

ભીમાહતજરાસન્ધઃ પ્રાર્થિતાયુધસઙ્ગરઃ ।
સ્વસઙ્કેતપ્રક્લૃપ્તાર્થો નિરર્થ્યોઽર્થી નિરાકૃતિઃ ॥ ૧૨૪॥

ગુણક્ષોભઃ સમગુણઃ સદ્ગુણાઢ્યઃ પ્રમાપ્રજઃ ।
સ્વાઙ્ગજઃ સાત્યકિભ્રાતા સન્માર્ગો ભક્તભૂષણઃ ॥ ૧૨૫॥

અકાર્યકાર્યનિર્વેદો વેદો ગોપાઙ્કનિદ્રિતઃ ।
અનાથો દાવપો દાવો દાહકો દુર્ધરોઽહતઃ ॥ ૧૨૬॥

ઋતવાગ્યાચકો વિપ્રઃ ખર્વ ઇન્દ્રપદપ્રદઃ ।
બલિમૂર્ધસ્થિતપદો બલિયજ્ઞવિઘાતકૃત્ ॥ ૧૨૭॥

યજ્ઞપૂર્તિર્યજ્ઞમૂર્તિર્યજ્ઞવિઘ્નમવિઘ્નકૃત્ ।
બલિદ્વાઃસ્થો દાનશીલો દાનશીલપ્રિયો વ્રતી ॥ ૧૨૮॥

અવ્રતો જતુકાગારસ્થિતપાણ્ડવજીવનમ્ ।
માર્ગદર્શી મૃદુર્હેલાદૂરીકૃતજગદ્ભયઃ ॥ ૧૨૯॥

સપ્તપાતાલપાદોઽસ્થિપર્વતો દ્રુમરોમકઃ ।
ઉડુમાલી ગ્રહાભૂષો દિક્ શ્રુતિસ્તટિનીશિરઃ ॥ ૧૩૦॥

વેદશ્વાસો જિતશ્વાસશ્ચિત્તસ્થશ્ચિત્તશુદ્ધિકૃત્ ।
ધીઃ સ્મૃતિઃ પુષ્ટિરજયઃ તુષ્ટિઃ કાન્તિર્ધૃતિસ્ત્રપા ॥ ૧૩૧॥

હલઃ કૃષિઃ કલં વૃષ્ટિર્ગૃષ્ટિર્ગૌરવનં વનમ્ ।
ક્ષીરં હવ્યં હવ્યવાહો હોમો વેદી સમિત્સ્રુવઃ ॥ ૧૩૨॥

કર્મ કર્મફલં સ્વર્ગો ભૂષ્યો ભૂષા મહાપ્રભુઃ ।
ભૂર્ભુવઃસ્વર્મહર્લોકો જનોલોકસ્તપોજનઃ ॥ ૧૩૩॥

સત્યો વિધિર્દૈવમધોલોકઃ પાતાલમણ્ડનઃ ।
જરાયુજઃ સ્વેદજનિરુદ્ભીજઃ કુલપર્વતઃ ॥ ૧૩૪॥

કુલસ્તમ્ભઃ સર્વકુલઃ કુલભૂઃ કૌલદૂરગઃ ।
ધર્મતત્વં નિર્વિષયો વિષયો ભોગલાલસઃ ॥ ૧૩૫॥

વેદાન્તસારો નિર્મોક્તા જીવો બદ્ધો બહિર્મુખઃ ।
પ્રધાનં પ્રકૃતિર્વિશ્વદ્રષ્ટા વિશ્વનિષેધનઃ ॥ ૧૩૬॥

અન્તશ્ચતુર્દ્વારમયો બહિર્દ્વારચતુષ્ટયઃ ।
ભુવનેશો ક્ષેત્રદેવોઽનન્તકાયો વિનાયકઃ ॥ ૧૩૭॥

પિતા માતા સુહૃદ્બન્ધુર્ભ્રાતા શ્રાદ્ધં યમોઽર્યમા ।
વિશ્વેદેવાઃ શ્રાદ્ધદેવો મનુર્નાન્દીમુખો ધનુઃ ॥ ૧૩૮॥

હેતિઃ ખડ્ગો રથો યુદ્ધં યુદ્ધકર્તા શરો ગુણઃ ।
યશો યશોરિપુઃ શત્રુરશત્રુર્વિજિતેન્દ્રિયઃ ॥ ૧૩૯॥

પાત્રં દાતા દાપયિતા દેશઃ કાલો ધનાગમઃ ।
કાઞ્ચનં પ્રેમ સન્મિત્રં પુત્રઃ કોશો વિકોશકઃ ॥ ૧૪૦॥

અનીતિઃ શરભો હિંસ્રો દ્વિપો દ્વીપી દ્વિપાઙ્કુશઃ ।
યન્તા નિગડ આલાનં સન્મનો ગજશૃઙ્ખલઃ ॥ ૧૪૧॥

મનોઽબ્જભૃઙ્ગો વિટપી ગજઃ ક્રોષ્ટા વૃશો વૃકઃ ।
સત્પથાચારનલિનીષટ્પદઃ કામભઞ્જનઃ ॥ ૧૪૨॥

સ્વીયચિત્તચકોરાબ્જઃ સ્વલીલાકૃતકૌતુકઃ ।
લીલાધામામ્બુભૃન્નાથઃ ક્ષોણી ભર્તા સુધાબ્ધિદઃ ॥ ૧૪૩॥

મલ્લાન્તકો મલ્લરૂપો બાલયુદ્ધપ્રવર્તનઃ ।
ચન્દ્રભાગાસરોનીરસીકરગ્લપિતક્લમઃ ॥ ૧૪૪॥

કન્દુકક્રીડનક્લાન્તો નેત્રમીલનકેલિમાન્ ।
ગોપીવસ્ત્રાપહરણઃ કદમ્બશિખરસ્થિતઃ ॥ ૧૪૫॥

બલ્લવીપ્રાર્થિતો ગોપીનતિદેષ્ટાઞ્જલિપ્રિયઃ ।
પરિહાસપરો રાસે રાસમણ્ડલમધ્યગઃ ॥ ૧૪૬॥

બલ્લવીદ્વયસંવીતઃ સ્વાત્મદ્વૈતાત્મશક્તિકઃ ।
ચતુર્વિંશતિભિન્નાત્મા ચતુર્વિંશતિશક્તિકઃ ॥ ૧૪૭॥

સ્વાત્મજ્ઞાનં સ્વાત્મજાતજગત્ત્રયમયાત્મકઃ ।
ઇતિ વિઠ્ઠલસંજ્ઞસ્ય વિષ્ણોર્નામસહસ્રકમ્ ॥ ૧૪૮॥

ત્રિકાલમેકકાલં વા શ્રદ્ધયા પ્રયતઃ પઠેત્ ।
સ વિષ્ણોર્નાત્ર સન્દેહઃ કિં બહૂક્તેન શૌનક ॥ ૧૪૯॥

કામી ચેન્નિયતાહારો જિતચિત્તો જિતેન્દ્રિયઃ ।
જપન્ કામાનવાપ્નોતિ ઇતિ વૈ નિશ્ચિતં દ્વિજ ॥ ૧૫૦॥

॥ ઇતિ શ્રીવિઠ્ઠલસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran

*Shri Vitthala Sahasranamastotram*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*